जागरिष्यन्-न्ती-ती, जागरयिष्यन्-न्ती-ती, जिजागरिषिष्यन्-न्ती-ती;
[1]जागः-जागरौ-जागरः, जागृत्-जागृतौ-जागृतः ;
जागरितम्-तः, जागरितः, जिजागरिषितः-तवान् ;
जागरः, [2]साधुजागरी, [3]जागरूकः[A], [4]जजागर्वान्-जजागृवान्,
[5]जजाग्राणः, जजागरणः, जिजागरिषुः ;
जागरितव्यम्, जागरयितव्यम्, जिजागरिषितव्यम् ;
जागरणीयम्, जागरणीयम्, जिजागरिषणीयम् ;
[6]जागर्यम्, जागर्यम्, जिजागरिष्यम् ;
ईषज्जागरः-दुर्जागरः-सुजागरः ; —
[7]जागर्यमाणः, जागर्यमाणः, जिजागरिष्यमाणः ;

---

1. क्विपि, 'जाग्रोऽविचिण्णल्ङित्सु' (7-3-85) इत्यत्र 'वि' शब्देन, औणादिक-क्विन्प्रत्ययस्यैव ग्रहणमिति पक्षेऽत्र गुणो भवत्येव । तदानीं गुणे, विसर्गे च 'जागः' इति रूपम् । 'वि' शब्दघटकेकारस्योच्चारणार्थत्वेन वकारादिप्रत्यये गुणनिषेधो यदीष्यते—तदानीं प्रकृते गुणाभावे, 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुगागमे **जागृत्** इति रूपम् । न च 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' (परिभाषा-21) इति प्रत्ययलक्षणनिषेधः शङ्क्यः ; तस्य वर्णप्राधान्यविषयत्वात्, अत्र च '**अतृणेट्**' इत्यत्रेव प्रत्ययप्राधान्यात् ।
'एवं क्विप्यपि वादित्वात् अगुणे ह्रस्वतस्तुकि ।
**जागृत्** स्यात् ; गुणपक्षे तु रेफान्तं **जागरि**त्यपि ॥' इति **प्र. स.**
2. 'साधुकारिण्युपसंख्यानम्' (वा. 3-2-78) इति णिनिः, गुणः ।
3. '**जागुरूकः**' (3-2-165) इति तच्छीलादिषु कर्तृषु ऊकप्रत्ययः ।
4. छान्दसोऽपि क्वसुः क्वचिद्भाषायामिति पक्षे, अस्माद्धातोः लिडादेशे क्वसुप्रत्यये द्वित्वे, 'नेड् वशि कृति' (7-2-8) इतीण्णिषेधे, '**जाग्रोऽवि—**' (7-3-85 इत्यत्र क्विन एव ग्रहणमित्यभ्युपगमे **जजागर्वान्** इति रूपम् । वकारादिप्रत्यये गुणनिषेधपक्षे **जजागृवान्** इति रूपम् ।
5. 'लिटः कानज् वा' (3-2-106) इति कानच् । प्रयोगाल्लोकेऽपीति **प्र. कौमुदी** '**जाग्रः** कानचि गुणो वा' इति केचित् ।' इति च । तेन रूपद्वयम् ।
6. 'ऋहलोर्ण्यत्' (3-1-124) इति ण्यति गुणे रूपम् ।
7. '**जाग्रोऽवि—**' (7-3 85) इति विहितो गुणः 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति प्राप्तं रिङादेशं पूर्वविप्रतिषेधाद् बाधते ।

A. 'पथिकोऽपररात्**जागरूकः** प्रबभाषे गिरमीदृशीं प्रसङ्गात् ॥'
**चम्पूभारते** 2.56.